श्री नीलसरस्वती स्तोत्रं

श्री नीलसरस्वती स्तोत्रं

घोररूपे महारावे सर्वशत्रुभयंकरि |
भक्तेभ्यो वरदे देवि त्राहि मां शरणागतं || 1 ||

सुराऽसुरार्चिते देवि सिद्धगंधर्वसेविते |
जाड्यपापहरे देवि त्राहि मां शरणागतं || 2 ||

जटाजूटसमायुक्ते लोलजिह्वांतकारिणी |
द्रुतबुद्धिकरे देवि त्राहि मां शरणागतं || 3 ||

सौम्यक्रोधधरे रूपे चंडरूपे नमोऽस्तु ते |
सृष्टिरूपे नमस्तुभ्यं त्राहि मां शरणागतं || 4 ||

जडानां जडतां हंति भक्तानां भक्तवत्सला |
मूढतां हर मे देवि त्राहि मां शरणागतं || 5 ||

ह्रूं ह्रूंकरमये देवि बलिहोमप्रिये नमः |
उग्रतारे नमो नित्यं त्राहि मां शरणागतं || 6 ||

बुद्धिं देहि यशो देहि कवित्वं देहि देवि मे |
मूढत्वं च हरेर्देवि त्राहि मां शरणागतं || 7 ||

इंद्रादिविलसद्वंद्ववंदिते करुणामयि |
तारे तारधिनाथास्ये त्राहि मां शरणागतं || 8 ||

अष्टम्यां च चतुर्दश्यां नवम्यां यः पठेन्नरः |
षण्मासैः सिद्धिमाप्नोति नाऽत्र कार्या विचारणा || 9 ||

मोक्षार्थी लभते मोक्षं धनार्थी लभते धनं |
विद्यार्थी लभते विद्यां तर्कव्याकरणादिकं || 10 ||

इदं स्तोत्रं पठेद्यस्तु सततं श्रद्धयान्वितः |
तस्य शत्रुः क्षयं याति महाप्रज्ञा प्रजायते || 11 ||

पीडायां वापि संग्रामे जाड्ये दाने तथा भये |
य इदं पठति स्तोत्रं शुभं तस्य न संशयः || 12 ||

इति प्रणम्य स्तुत्वा च योनिमुद्रां प्रदर्शयेत् ||

इति श्री नीलसरस्वती स्तोत्रं ||